# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा - शास्त्री-२, सेमेस्टर-३** | **प्रश्नपत्रम् - ६** | **गुणा: - ७०**
**विषय: - पुराणेतिहास:** | **कोड - CC-2.3.6** | **समय: - ०३-०६**
**दिनाङ्क: - ३०.११.२०१६** | **ग्रन्थ: - महाभारते वनपर्वणि-नलोपाख्यानपर्व ( अ. ५२तः७९ )**

---

### प्रथमान्विति: ( युनिट - १ )

**प्रश्न: १ कयोश्चिद् द्वयो: ससन्दर्भं विवेचनं विधीयताम् । ०८**

*(१) निकृत्या निकृतिप्रज्ञा हन्तव्या इति निश्चय: ।*
*न हि नैकृतिकं हत्वा निकृत्या पापमुच्यते ॥*

*(२) मनसा वचसा चैव यथा नाभिचराम्यहम् ।*
*तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ॥*

*(३) यथा यथा हि नृपति: पुष्करेणैव जीयते ।*
*तथा तथास्य वै द्यूते रागो भूयोऽभिवर्धते ॥*

**प्रश्न: २** *(१) नलोपाख्यानपर्वण: सारं लिखन्तु ।* **०८**

*अथवा*

*(२) दमयन्तीस्वयंवरवर्णनं यथाग्रन्थं कुरुत ।*

**प्रश्न: ३ टिप्पणीद्वयं लिखत । ०४**

*(१) हंस:* *(२) नल:*
*(३) दमयन्ती* *(४) द्यूतम्*

**प्रश्न: ४ अतिलघूत्तराणि लिखत । ०५**

*(१) क: पुण्यश्लोक: प्रोक्त: ?*
*(२) बृहत्सेना काऽवर्तत ?*
*(३) पुष्कर: क आसीत् ?*
*(४) नलस्य पुत्रीपुत्रयो: केऽभिधाने अवर्तताम् ?*
*(५) नलोपाख्यानं क: कथयति, कस्मै च ?*
*(६) देवानां कानि चिह्नानि भवन्ति ?*
*(७) ''भैमी'' नाम का ? कस्मात् च ?*

### द्वितीयान्विति: ( युनिट - २ )

**प्रश्न: ५ कयोश्चिद् द्वयो: ससन्दर्भं भावार्थं लिखत । ०८**

*(१) चत्वार एकतो वेदा: साङ्गोपाङ्गा सविस्तरा: ।*
*स्वधीता मनुजव्याघ्र सत्यमेकं किलैकत: ॥*

*(२) यथा विशोका गच्छेयमशोकनग तत् कुरु ।*
*सत्यनामा भवाशोक अशोक: शोकनाशन: ॥*

(३) *भासि विद्युदिवाभ्रेषु शंस मे कासि कस्य वा ।*
*न हि ते मानुषं रूपं भूषणैरपि वर्जितम् ।*

**प्रश्नः ६** *दमयन्त्याः वनवाससङ्घर्षं विवेचयत ।* **०८**

*अथवा*

*दमयन्तीविलापवर्णनं सविस्तरं विधीयताम् ।*

**प्रश्नः ७ टिप्पणीद्वयं लिखत ।** **०४**

*(१) कर्कोटकप्रसङ्गः* *(२) अश्वाध्यक्षरूपेण नलः*
*(३) नलान्वेषणम्* *(४) सुदेवविप्रस्य वचांसि*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ८ ससन्दर्भं द्वयोः भावार्थं लिखत ।** **०८**

(१) *अथ चेह नलो विद्यां वेत्ति तामेव बाहुकः ।*
*तुल्यं हि लक्षये ज्ञानं बाहुकस्य नलस्य च ॥*

(२) *सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।*
*नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ॥*

(३) *गच्छ केशिनि जानीहि क एष रथवाहकः ।*
*उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः ॥*

**प्रश्नः ९** *नलस्य हयज्ञत्वं विवेचयत ।* **०८**

*अथवा*

*बाहुक-केशिनीसंवादं सविस्तरं यताग्रन्थं प्रतिपादयत् ।*

**प्रश्नः १० टिप्पणीद्वयं लिखत ।** **०४**

*(१) ऋतुपर्णस्य अङ्कविद्या ।*
*(२) नलस्य पुनः राज्यप्राप्तिः ।*
*(३) दमयन्तीकृतः शोकः ।*
*(४) केशिनीकृता बाहुकपरीक्षा ।*

**प्रश्नः ११ लघूत्तराणि यच्छत ।( पञ्चानामेव )** **०५**

*(१) को भाङ्गासुरिः प्रोक्तः ?*
*(२) बाहुकः कः अवर्तत ?*
*(३) मातलिः कः वर्तते ?*
*(४) ''वैदर्भी'' कस्याः नाम अवर्तत ?*
*(५) ''प्रतिपाणः'' इत्यस्य कोऽर्थः ?*
*(६) नलस्य पितुः नाम किम् आसीत् ?*
*(७) बृहदश्वः ''कौन्तेय'' इति वदति चेत् कौन्तेयो नाम अत्र कः ?*

=०=